**पस्पशाह्निक**माश्रित्यापठिताः पठिता नु वा।
एते प्रश्नास्तु सम्भाव्याः पठन्तु गृहवासिनः॥

१) **दशाङ्कस्य एकः प्रश्नः** संस्कृतभाषया देवनागरीलिप्या च समाधेयाः॥

**क)** "अथ गौरित्यत्र कः शब्दः" इति ग्रन्थसन्दर्भं समाश्रित्य शब्दस्वरूपं भाष्यकारदिशा स्पष्टीक्रियताम्॥

**ख)** स्फोटस्वरूपं निरूप्यताम्॥

**ग)** व्याकरणाध्यनस्य पञ्चमुख्यप्रयोजनानि महाभाष्यानुसारं प्रतिपाद्यानि॥

**घ)** व्याकरणाध्यनस्य गौणप्रयोजनानि महाभाष्यानुसारं वर्णनीयानि॥

**ङ)** "ज्ञाने धर्मः आहोस्वित् प्रयोगे" इति सन्दर्भस्याशयः प्रसङ्गसङ्गतिपुरःसरमालोचनीयः॥

**च)** "सिद्धे शब्दार्थसम्बन्धे" इत्यत्र शब्दार्धसम्बन्धस्य नित्यत्वं कथं प्रतिपादितं भाष्यकारेण॥

२) **सप्ताङ्कस्य एकस्य** व्याख्या करणीया संस्कृतभाषया देवनागरीलिप्या च ॥

क) अथ शब्दानुशासनम्॥

ख) येनोच्चारितेन सास्नालाङ्गूलककुदखुरविषाणीनां सम्प्रत्ययो भवति स शब्दः॥

ग) प्रतीतपदार्थको लोके ध्वनिः शब्दः इत्युच्यते॥

घ) दुष्टशब्दः स्वरतो वर्णतो वा
मिथ्याप्रयुक्तो न तमर्थमाह।
स वाग्वज्रो यजमानं हिनस्ति
यथेन्द्रशत्रुः स्वरतोऽपराधात्॥

ङ) यस्तु प्रयुङ्क्ते कुशलो विशेषे
शब्दान्यथावद्व्यवहार काले।
सोऽनन्तमाप्नोति जयं परत्र

वाग्योगविद्दुष्यति चापशब्दैः॥

च) चत्वारि शृङ्गा त्रयो अस्य पादा
द्वे शीर्षे सप्त हस्तासो अस्य।
त्रिधा बद्धो वृषभो रोरवीति
महो देवो मर्त्या आ विवेशः॥

छ) चत्वारि वाक् परिमिता पदानि
तानि विदुर्ये ब्रह्मणा मनीषिणः।
गुहा त्रीणि निहिता नेङ्गयन्ति
तुरीयं वाचो मनुष्या वदन्ति॥

३) **चतुरङ्कविशिष्ट-द्वयोः** प्रश्नयोः उत्तरं प्रदेयं संस्कृतभाषया देवनागरीलिप्या च॥

**क)** महाभाष्य-पस्पशाह्निकम्॥

**ख)** रक्षा ॥

**ग)** ऊहः ॥

**घ)** आगमः ॥

**ङ)** लघुता ॥

**च)** असन्देहः ॥

**छ)** व्याकरणम् ॥

**ज)** पतञ्जलिः ॥

Abhijit Mandal